# vishvalochanachakrapUjA

# વિશ્વલોચનચક્રપૂજા

## Document Information

Text title : vishvalochanachakrapUjA

File name : vishvalochanachakrapUjA.itx

Category : pUjA, hanumaana

Location : doc_hanumaana

Transliterated by : Shri Devi Kumar, refined by PSA Easwaran

Proofread by : PSA Easwaran

Description-comments : From Hanumatstutimanjari, Mahaperiaval Publication

Acknowledge-Permission: Mahaperiyaval Trust

Latest update : April 24, 2016

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# વિશ્વલોચનચક્રપૂજા

ૐ નમો ભગવતે હનુમતે રુદ્રાવતારાય મહાબલાય આઞ્જનેયાય
વાયુપુત્રાય કોસલેન્દ્રાનુચરાય સામ્પ્રતં સ્વાત્માનં દર્શય સત્યં વદ
વદ સ્વાહા હાં હાં ૐ ॥ ઇતિ મન્ત્રઃ ।
ૐ અસ્ય શ્રીવિશ્વલોચનચક્રરાજહનુમન્મહામન્ત્રસ્ય
અગસ્ત્યઋષિઃ અતિજગતીચ્છન્દઃ । કોસલેન્દ્રાનુચરો મહેશ્વરો
હનુમાન્દેવતા । હાં બીજમ્ । સ્વાહા શક્તિઃ । નમઃ કીલકમ્ ।
સ્વાત્મદર્શને વિનિયોગઃ ।
ઋષ્યાદિન્યાસઃ ॥

ૐ અગસ્ત્યઋષયે નમઃ । શિરસિ ।
ૐ અતિજગતીચ્છન્દસે નમઃ । મુખે ।
ૐ કોસલેન્દ્રાનુચરાય મહેશ્વરાય હનુમતે દેવતાયૈ નમઃ । હૃદિ ।
ૐ હાં બીજાય નમઃ ગુહ્યે ।
ૐ સ્વાહા શક્તયે નમઃ । પાદયોઃ ।
ૐ નમઃ કીલકાય નમઃ । નાભૌ ।
ૐ સ્વાત્મદર્શનવિનિયોગાય નમઃ સર્વાઙ્ગે ॥

હૃદયાદિષડઙ્ગન્યાસઃ । ૐ નમો ભગવતે હાં હનુમતે હૃદયાય નમઃ ।
ૐ રુદ્રાવતારાય મહાબલાય હીં હનુમતે શિરસે સ્વાહા ।
ૐ આઞ્જનેયાય વાયુપુત્રાય હૂં હનુમતે શિખાયૈ વષટ્ ।
ૐ કોસલેન્દ્રાનુચરાય હૈં હનુમતે કવચાય હુમ્ ।
ૐ સામ્પ્રતં સ્વાત્માનં દર્શય દર્શય હૌં હનુમતે નેત્રત્રયાય વૌષટ્ ।
ૐ સત્યં વદ વદ સ્વાહા હાં હાં ૐ હઃ હનુમતે અસ્ત્રાય ફટ્ ।
ધ્યાનમ્ ।
મનોજવં મારુતતુલ્યવેગં જિતેન્દ્રિયં બુદ્ધિમતાં વરિષ્ઠમ્ ।
વાતાત્મજં વાનરયૂથમુખ્યં શ્રીરામદૂતં શિરસા નમામિ ॥

પીઠદેવતાપ્રતિષ્ઠા ।
ૐ મં મણ્ડૂકાદિપરતત્ત્વપીઠદેવતાભ્યો નમઃ ।
ૐ વિમલાયૈ નમઃ । ૐ જ્ઞાનાયૈ નમઃ । ૐ ક્રિયાયૈ નમઃ ।
ૐ યોગાયૈ નમઃ । ૐ પ્રહ્વાયૈ નમઃ । ૐ સત્યાયૈ નમઃ ।
ૐ ઈશાનાયૈ નમઃ । મધ્યે । ૐ અનુગ્રહાયૈ નમઃ ।
ૐ નમો ભગવતે રુદ્રાય સર્વભૂતાત્મને હનુમતે
સર્વાત્મસંયોગપદ્મપીઠાત્મને નમઃ ॥ ઇતિ હનુમન્તં પીઠે નિધાય ।
ૐ સવિન્મય પરો દેવ પરામૃતરસપ્રિય ।
વિશ્વલોચનચક્રપૂજા -
અનુજ્ઞાં હનુમન્ દેહિ પરિવારાર્ચનાય મે ॥ ઇતિ પુષ્પાઞ્જલિં દદ્યાત્ ।
આવરણપૂજા ॥ -
(મધ્યે) ૐ રાં રામાય નમઃ । રામશ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
(પૂર્વે) ૐ હાં હનુમતે નમઃ હનુમચ્છ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
(ઈશાન્યે) ૐ સં સુગ્રીવાય નમઃ સુગ્રીવશ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
(આગ્નેય્યે) ૐ લં લક્ષ્મણાય નમઃ લક્ષ્મણશ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ
।
ૐ અભીષ્ટસિદ્ધિં મેં દેહિ શરણાગતવત્સલ ।
ભક્ત્યા સમર્પયે તુભ્યં પ્રથમાવરણાર્ચનમ્ ॥

ૐ અણિમાયૈ નમઃ । અણિમાશ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ મહિમાયૈ નમઃ । મહિમાશ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ગરિમાયૈ નમઃ । ગરિમાશ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ લઘિમાયૈ નમઃ । લઘિમાશ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ પ્રાપ્ત્યૈ નમઃ । પ્રાપ્તિશ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ પ્રાકામ્યાયૈ નમઃ । પ્રાકામ્યશ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ઈશિતાયૈ નમઃ । ઈશિતાશ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ વશિતાયૈ નમઃ । વશિતાશ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ અભીષ્ટસિદ્ધિં મે દેહિ શરણાગતવત્સલ ।
ભક્ત્યા સમર્પયે તુભ્યં દ્વિતીયાવરણાર્ચનમ્ ॥

ૐ વિજયધ્વજાય નમઃ । ૐ સિંહધ્વજાય નમઃ । ૐ હલધ્વજાય નમઃ ।
ૐ સુષેણાય નમઃ । ૐ ભદ્રસેનાય નમઃ । ૐ જયસેનાય નમઃ ।
ૐ વિજયસેનાય નમઃ । ૐ ગોમુખાય નમઃ । ૐ દધિમુખાય નમઃ ।

ૐ જડલાઙ્ગૂલાય નમઃ । ૐ મહીલાઙ્ગૂલાય નમઃ । ૐ કાલાય નમઃ ।
ૐ મહાકાલાય નમઃ । ૐ વજ્રસારાય નમઃ । ૐ મહાસારાય નમઃ ।
ૐ મકરધ્વજાય નમઃ ।
ૐ અભીષ્ટસિદ્ધિં મે દેહિ શરણાગતવત્સલ ।
ભક્ત્યા સમર્પયે તુભ્યં તૃતીયાવરણાર્ચનમ્ ॥

(ઇતઃ પરં વૃત્તે માતૃકાક્ષરાણિ દ્વારેષુ દિક્પતિતદાયુધપૂજા ચ
ઇત્યાવરણપૂજાં કૃત્વા ધૂપાદિના સમ્પૂજ્ય સ્તોત્રાદિના હનૂમન્તં
સ્તુત્વા માલાં સંસ્કૃતામાદાય હૃદયે ધારયન્ મૌની એકાગ્રચિત્તઃ
ભૂત્વા મૂલમન્ત્રં જપતિ ॥ )
અસ્ય મન્ત્રસ્ય પુરશ્ચરણમેકલક્ષજપઃ । બદલઘૃતૈઃ દશાંશતો હોમઃ
।
તદ્દશાંશેન ત્રિમધુભિઃ (મધુઘૃતશર્કરાભિઃ) તર્પણમ્ ।
તદ્દશાંશેન ગન્ધવારિભિઃ માર્જનમ્ । તદ્દશાંશેન મોદકૈઃ પાયસેન વા
બ્રાહ્મણભોજનમ્ ।
ઇતિ મન્ત્રસિદ્ધિઃ ॥

દીપપૂજા-શુક્ર-શનિ-ભૌમવાસરે ઘૃતદીપં સ્વર્ણાદિપાત્રે
સુગન્ધવર્ત્યા સંયોજ્ય ૐ હનુમદ્દીપાય નમઃ ઇતિ દીપં સમ્પૂજ્ય પ્રજ્વાલ્ય
કજ્જલં પાયયેત્ ।
ૐ હનુમદઞ્જનાય નમઃ । ઇતિ કજ્જલં સમ્પૂજ્ય તતઃ વિશાલે શોભને
પાત્રે દ્વ્યઙ્ગુલં વર્તુલં તદુપરિ ચતુરઙ્ગુલં ચક્રવાલં અલક્તકેન
વિધાય,
તત્રાદ્યમણ્ડલે સુગન્ધેન સ્નેહેન કજ્જલં સંયોજ્ય તદુપરિ મણ્ડલં
કુઙ્કુમેન સંલિપ્ય ભૂર્જપત્રે મૂલમન્ત્રં લિખિત્વા, મન્ત્રાન્તરે ચ
પત્રાન્તરયોઃ
સ્થાનનિરૂપકતગરાદીન્ અગરુકર્પૂરકલ્કેન નિરૂપયેત્ તદગ્રે યન્ત્રં
લિખિત્વા તેષાં મૂલમન્ત્રેણ ષોડશોપચારૈઃ સમ્પૂજયેત્ ॥

ૐ જયત્યતિબલો રામો લક્ષ્મણશ્ચ મહાબલઃ ।
રાજા જયતિ સુગ્રીવો હનુમાન્કાર્યસાધકઃ ॥ ઇતિ વા મન્ત્રેણ સમ્પૂજનમ્ ॥

તતઃ સ્નાતં શુદ્ધં અખણ્ડિતબ્રહ્મચર્યં અદૂષિતં વટું આનીય તત્ર
સંસ્થાપ્ય તસ્ય મન્ત્રં શ્રાવયેત્ પૂજાં ચ કારયેત્ । તતઃ ગોઘૃતેન

તૈલેન વા દીપં પ્રજ્વાલ્ય શુચિઃ પ્રયતઃ સાધકઃ મૌનેન
અષ્ટોત્તરશતવારં મૂલમન્ત્રં જપેત્ ।
તતો વટું સમુત્ત્થાપ્ય દીપકેન સ્પૃષ્ટ્ કૃત્વા મેચકમણ્ડલે
નેત્રં દત્વા દીપં પશ્યેત્ । તત્ર મન્ત્રત્રયં જપેત્ । હું ઇતિ ઉચ્ચરન્ વટું
પૃચ્છેત્ - કિં પશ્યસિ? ” ઇતિ । એવં પુનઃ પુનઃ પૃચ્છેત્ ॥

વટુઃ પૂર્વં તેજોમણ્ડલં પશ્યતિ । તત ઉત્તરં; તત ઉપવેશનમ્ । તતઃ
પ્રભામ્ । તતઃ સમયદેવતાઃ । તતઃ સિંહાસનમ્ । અનન્તરં અનુક્રમં
હનૂમન્તં, સુગ્રીવં, લક્ષ્મણં, શ્રીરામં ચ પશ્યતિ । તતઃ સ્વચિન્તિતં
કાર્યં યજમાનઃ વટવે શ્રાવયેત્ । વટુઃ કૃતાઞ્જલિર્ભૂત્વા “ભગવન્
હનુમન્ મયા નિવેદિતં કાર્યં કૃપયા વદતુ ભવાન્ ।” ઇતિ બ્રૂયાત્ ।
તદ્ભાષિતં શ્રુત્વા યજમાનઃ ગુરવે નિવેદયેત્ । તેન સિદ્ધ્યસિદ્ધી જાનીયાત્ ।
યદા તુ વટુઃ કિમપિ ન પશ્યતિ, અન્યથા વા પશ્યતિ ગિરિ-સમુદ્રયક્ષ-
રાક્ષસ-નર-નારી-પશુ-પક્ષિગણં પશ્યતિ, તદપિ તદા શુભાશુભં
તદ્રૂપેણ જાનીયાત્ । યદ્યનિષ્ટં પશ્યતિ તદા યન્ત્રં વટુશિરસિ
નિધાય મન્ત્રં જપ્ત્વા પુનઃ “કિં પશ્યસિ” ઇતિ તં પૃચ્છેત્ । તતઃ ઇષ્ટં
પશ્યતિ । અનન્તરં કાર્યં પૃચ્છેત્ । ચોર-જાર-નારી-ધૂતાદીનાં પ્રશ્નં
ન કુર્યાત્ ॥

શાન્ત્યર્થં શ્વેતવસ્ત્રમાલ્યનૈવેદ્યોપચારૈઃ તુષ્ટિં કુર્યાત્ ।
ઇતરે રક્તવસ્ત્રાણિ ધારયેયુઃ । કાર્યસિદ્ધિર્ભવતિ । પ્રશ્નાવેલા
અર્ધરાત્રિરેવ ॥

ઇત્યગસ્ત્યસંહિતાયાં વિશ્વલોચનચક્રપૂજાવિધાનં સમાપ્તમ્ ॥

---

From Hanumatstutimanjari, Mahaperiaval Publication
Proofread by PSA Easwaran psaeaswaran at gmail

---

*vishvalochanachakrapUjA*
pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*